# Nadabindu Upanishad

## નાદબિન્દૂપનિષત્

## Document Information

Text title : Nadabindu Upanishad

File name : nadabindu.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 38/108; Rig Veda, Yoga Upanishad

Latest update : July, 3, 1999, February 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# નાદબિન્દૂપનિષત્

(ઋગ્વેદીય યોગોપનિષત્)

વૈરાજાત્મોપાસનયા સઞ્જાતજ્ઞાનવહ્નિના ।
દગ્ધ્વા કર્મત્રયં યોગી યત્પદં યાતિ તદ્ભજે ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ટિતમ્ ।
આવિરાવીર્મ એધિ । વેદસ્ય મા આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીઃ ।
અનેનાધીતેનાહોરાત્રાન્સન્દધામિ ।
ઋતં વદિષ્યામિ । સત્યં વદિષ્યામિ ।
તન્મામવતુ । તદ્વક્તારમવતુ ।
અવતુ મામવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ અકારો દક્ષિણઃ પક્ષ ઉકારસ્તૂત્તરઃ સ્મૃતઃ ।
મકારં પુચ્છમિત્યાહુરર્ધમાત્રા તુ મસ્તકમ્ ॥ ૧॥

પાદાદિકં ગુણાસ્તસ્ય શરીરં તત્ત્વમુચ્યતે ।
ધર્મોઽસ્ય દક્ષિણશ્ચક્ષુરધર્મો યોઽપરઃ સ્મૃતઃ ॥ ૨॥

ભૂર્લોકઃ પાદયોસ્તસ્ય ભુવર્લોકસ્તુ જાનુનિ ।
સુવર્લોકઃ કટીદેશે નાભિદેશે મહર્જગત્ ॥ ૩॥

જનોલોકસ્તુ હૃદ્દેશે કણ્ઠે લોકસ્તપસ્તતઃ ।
ભ્રુવોર્લલાટમધ્યે તુ સત્યલોકો વ્યવસ્થિતઃ ॥ ૪॥

સહસ્રાર્ણમતીવાત્ર મન્ત્ર એષ પ્રદર્શિતઃ ।
એવમેતાં સમારૂઢો હંસયોગવિચક્ષણઃ ॥ ૫॥

ન ભિદ્યતે કર્મચારૈઃ પાપકોટિશતૈરપિ ।
આગ્નેયી પ્રથમા માત્રા વાયવ્યેષા તથાપરા ॥ ૬॥

ભાનુમણ્ડલસંકાશા ભવેન્માત્રા તથોત્તરા ।
પરમા ચાર્ધમાત્રા યા વારુણીં તાં વિદુર્બુધાઃ ॥ ૭॥

કાલત્રયેઽપિ યત્રેમા માત્રા નૂનં પ્રતિષ્ઠિતાઃ ।
એષ ઓઙ્કાર આખ્યાતો ધારણાભિર્નિબોધત ॥ ૮॥

ઘોષિણી પ્રથમા માત્રા વિદ્યુન્માત્રા તથાઽપરા ।
પતઙ્ગિની તૃતીયા સ્યાચ્ચતુર્થી વાયુવેગિની ॥ ૯॥

પઞ્ચમી નામધેયા તુ ષષ્ઠી ચૈન્દ્ર્યભિધીયતે ।
સપ્તમી વૈષ્ણવી નામ અષ્ટમી શાઙ્કરીતિ ચ ॥ ૧૦॥

નવમી મહતી નામ ધૃતિસ્તુ દશમી મતા ।
એકાદશી ભવેન્નારી બ્રાહ્મી તુ દ્વાદશી પરા ॥ ૧૧॥

પ્રથમાયાં તુ માત્રાયાં યદિ પ્રાણૈર્વિયુજ્યતે ।
ભરતે વર્ષરાજાસૌ સાર્વભૌમઃ પ્રજાયતે ॥ ૧૨॥

દ્વિતીયાયાં સમુત્ક્રાન્તો ભવેદ્યક્ષો મહાત્મવાન્ ।
વિદ્યાધરસ્તૃતીયાયાં ગાન્ધર્વસ્તુ ચતુર્થિકા ॥ ૧૩॥

પઞ્ચમ્યામથ માત્રાયાં યદિ પ્રાણૈર્વિયુજ્યતે ।
ઉષિતઃ સહ દેવત્વં સોમલોકે મહીયતે ॥ ૧૪॥

ષષ્ઠ્યામિન્દ્રસ્ય સાયુજ્યં સપ્તમ્યાં વૈષ્ણવં પદમ્ ।
અષ્ટમ્યાં વ્રજતે રુદ્રં પશૂનાં ચ પતિં તથા ॥ ૧૫॥

નવમ્યાં તુ મહર્લોકં દશમ્યાં તુ જનં વ્રજેત્ ।
એકાદશ્યાં તપોલોકં દ્વાદશ્યાં બ્રહ્મ શાશ્વતમ્ ॥ ૧૬॥

તતઃ પરતરં શુદ્ધં વ્યાપકં નિર્મલં શિવમ્ ।
સદોદિતં પરં બ્રહ્મ જ્યોતિષામુદયો યતઃ ॥ ૧૭॥

અતીન્દ્રિયં ગુણાતીતં મનો લીનં યદા ભવેત્ ।
અનૂપમં શિવં શાન્તં યોગયુક્તં સદા વિશેત્ ॥ ૧૮॥

તદ્યુક્તસ્તન્મયો જન્તુઃ શનૈર્મુઞ્ચેત્કલેવરમ્ ।
સંસ્થિતો યોગચારેણ સર્વસઙ્ગવિવર્જિતઃ ॥ ૧૯॥

તતો વિલીનપાશોઽસૌ વિમલઃ કમલાપ્રભુઃ ।
તેનૈવ બ્રહ્મભાવેન પરમાનન્દમશ્નુતે ॥ ૨૦॥

આત્માનં સતતં જ્ઞાત્વા કાલં નય મહામતે ।
પ્રારબ્ધમખિલં ભુઞ્જન્નોદ્વેગં કર્તુમર્હસિ ॥ ૨૧॥

ઉત્પન્ને તત્ત્વવિજ્ઞાને પ્રારબ્ધં નૈવ મુઞ્ચતિ ।
તત્ત્વજ્ઞાનોદયાદૂર્ધ્વં પ્રારબ્ધં નૈવ વિદ્યતે ॥ ૨૨॥

દેહાદીનામસત્ત્વાત્તુ યથા સ્વપ્નો વિબોધતઃ ।
કર્મ જન્માન્તરીયં યત્પ્રારબ્ધમિતિ કીર્તિતમ્ ॥ ૨૩॥

તત્તુ જન્માન્તરાભાવાત્પુંસો નૈવાસ્તિ કર્હિચિત્ ।
સ્વપ્નદેહો યથાધ્યસ્તસ્તથૈવાયં હિ દેહકઃ ॥ ૨૪॥

અધ્યસ્તસ્ય કુતો જન્મ જન્માભાવે કુતઃ સ્થિતિઃ ।
ઉપાદાનં પ્રપઞ્ચસ્ય મૃદ્ભાણ્ડસ્યેવ પશ્યતિ ॥ ૨૫॥

અજ્ઞાનં ચેતિ વેદાન્તૈસ્તસ્મિન્નષ્ટે ક્વ વિશ્વતા ।
યથા રજ્જું પરિત્યજ્ય સર્પં ગૃહ્ણાતિ વૈ ભ્રમાત્ ॥ ૨૬॥

તદ્વત્સત્યમવિજ્ઞાય જગત્પશ્યતિ મૂઢધીઃ ।
રજ્જુખણ્ડે પરિજ્ઞાતે સર્પરૂપં ન તિષ્ઠતિ ॥ ૨૭॥

અધિષ્ઠાને તથા જ્ઞાતે પ્રપઞ્ચે શૂન્યતાં ગતે ।
દેહસ્યાપિ પ્રપઞ્ચત્વાત્પ્રારબ્ધાવસ્થિતિઃ કૃતઃ ॥ ૨૮॥

અજ્ઞાનજનબોધાર્થં પ્રારબ્ધમિતિ ચોચ્યતે ।
તતઃ કાલવશાદેવ પ્રારબ્ધે તુ ક્ષયં ગતે ॥ ૨૯॥

બ્રહ્મપ્રણવસન્ધાનં નાદો જ્યોતિર્મયઃ શિવઃ ।
સ્વયમાવિર્ભવેદાત્મા મેઘાપાયેંઽશુમાનિવ ॥ ૩૦॥

સિદ્ધાસને સ્થિતો યોગી મુદ્રાં સન્ધાય વૈષ્ણવીમ્ ।
શ‍ૃણુયાદ્દક્ષિણે કર્ણે નાદમન્તર્ગતં સદા ॥ ૩૧॥

અભ્યસ્યમાનો નાદોઽયં બાહ્યમાવૃણુતે ધ્વનિમ્ ।
પક્ષાદ્વિપક્ષમખિલં જિત્વા તુર્યપદં વ્રજેત્ ॥ ૩૨॥

શ્રૂયતે પ્રથમાભ્યાસે નાદો નાનાવિધો મહાન્ ।
વર્ધમાનસ્તથાભ્યાસે શ્રૂયતે સૂક્ષ્મસૂક્ષ્મતઃ ॥ ૩૩॥

આદૌ જલધિજીમૂતભેરીનિર્ઝરસમ્ભવઃ ।

મધ્યે મર્દલશબ્દાભો ઘણ્ટાકાહલજસ્તથા ॥ ૩૪॥

અન્તે તુ કિઙ્કિણીવંશવીણાભ્રમરનિઃસ્વનઃ ।
ઇતિ નાનાવિધા નાદાઃ શ્રૂયન્તે સૂક્ષ્મસૂક્ષ્મતઃ ॥ ૩૫॥

મહતિ શ્રૂયમાણે તુ મહાભેર્યાદિકધ્વનૌ ।
તત્ર સૂક્ષ્મં સૂક્ષ્મતરં નાદમેવ પરામૃશેત્ ॥ ૩૬॥

ઘનમુત્સૃજ્ય વા સૂક્ષ્મે સૂક્ષ્મમુત્સૃજ્ય વા ઘને ।
રમમાણમપિ ક્ષિપ્તં મનો નાન્યત્ર ચાલયેત્ ॥ ૩૭॥

યત્ર કુત્રાપિ વા નાદે લગતિ પ્રથમં મનઃ ।
તત્ર તત્ર સ્થિરીભૂત્વા તેન સાર્ધં વિલીયતે ॥ ૩૮॥

વિસ્મૃત્ય સકલં બાહ્યં નાદે દુગ્ધામ્બુવન્મનઃ ।
એકીભૂયાથ સહસા ચિદાકાશે વિલીયતે ॥ ૩૯॥

ઉદાસીનસ્તતો ભૂત્વા સદાભ્યાસેન સંયમી ।
ઉન્મનીકારકં સદ્યો નાદમેવાવધારયેત્ ॥ ૪૦॥

સર્વચિન્તાં સમુત્સૃજ્ય સર્વચેષ્ટાવિવર્જિતઃ ।
નાદમેવાનુસંદધ્યાન્નાદે ચિત્તં વિલીયતે ॥ ૪૧॥

મકરન્દં પિબન્ભૃઙ્ગો ગન્ધાન્નાપેક્ષતે તથા ।
નાદાસક્તં સદા ચિત્તં વિષયં ન હિ કાઙ્ક્ષતિ ॥ ૪૨॥

બદ્ધઃ સુનાદગન્ધેન સદ્યઃ સંત્યક્તચાપલઃ ।
નાદગ્રહણતશ્ચિત્તમન્તરઙ્ગભુજઙ્ગમઃ ॥ ૪૩॥

વિસ્મૃત્ય વિશ્વમેકાગ્રઃ કુત્રચિન્ન હિ ધાવતિ ।
મનોમત્તગજેન્દ્રસ્ય વિષયોદ્યાનચારિણઃ ॥ ૪૪॥

નિયામનસમર્થોઽયં નિનાદો નિશિતાઙ્કુશઃ ।
નાદોઽન્તરઙ્ગસારઙ્ગબન્ધને વાગુરાયતે ॥ ૪૫॥

અન્તરઙ્ગસમુદ્રસ્ય રોધે વેલાયતેઽપિ ચ ।
બ્રહ્મપ્રણવસંલગ્નનાદો જ્યોતિર્મયાત્મકઃ ॥ ૪૬॥

મનસ્તત્ર લયં યાતિ તદ્વિષ્ણોઃ પરમં પદમ્ ।
તાવદાકાશસઙ્કલ્પો યાવચ્છબ્દઃ પ્રવતતે ॥ ૪૭॥

નિઃશબ્દં તત્પરં બ્રહ્મ પરમાત્મા સમીર્યતે ।
નાદો યાવન્મનસ્તાવન્નાદાન્તેઽપિ મનોન્મની ॥ ૪૮॥

સશબ્દશ્ચાક્ષરે ક્ષીણે નિઃશબ્દં પરમં પદમ્ ।
સદા નાદાનુસન્ધાનાત્સંક્ષીણા વાસના ભવેત્ ॥ ૪૯॥

નિરઞ્જને વિલીયેતે મનોવાયૂ ન સંશયઃ ।
નાદકોટિસહસ્રાણિ બિન્દુકોટિશતાનિ ચ ॥ ૫૦॥

સર્વે તત્ર લયં યાન્તિ બ્રહ્મપ્રણવનાદકે ।
સર્વાવસ્થાવિનિર્મુક્તઃ સર્વચિન્તાવિવર્જિતઃ ॥ ૫૧॥

મૃતવત્તિષ્ઠતે યોગી સ મુક્તો નાત્ર સંશયઃ ।
શઙ્ખદુન્દુભિનાદં ચ ન શ્રુણોતિ કદાચન ॥ ૫૨॥

કાષ્ઠવજ્જ્ઞાયતે દેહ ઉન્મન્યાવસ્થયા ધ્રુવમ્ ।
ન જાનાતિ સ શીતોષ્ણં ન દુઃખં ન સુખં તથા ॥ ૫૩॥

ન માનં નાવમાનં ચ સંત્યક્ત્વા તુ સમાધિના ।
અવસ્થાત્રયમન્વેતિ ન ચિત્તં યોગિનઃ સદા ॥ ૫૪॥

જાગ્રન્નિદ્રાવિનિર્મુક્તઃ સ્વરૂપાવસ્થતામિયાત્ ॥ ૫૫॥

દૃષ્ટિઃ સ્થિરા યસ્ય વિના સદૃશ્યં
  વાયુઃ સ્થિરો યસ્ય વિના પ્રયત્નમ્ ।
ચિત્તં સ્થિરં યસ્ય વિનાવલમ્બં
  સ બ્રહ્મતારાન્તરનાદરૂપઃ ॥ ૫૬॥

ઇત્યુપનિષત્ ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ટિતમ્ ।
આવિરાવીર્મ એધિ । વેદસ્ય મા આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીઃ ।
અનેનાધીતેનાહોરાત્રાન્સન્દધામિ ।
ઋતં વદિષ્યામિ । સત્યં વદિષ્યામિ ।
તન્મામવતુ । તદ્વક્તારમવતુ ।
અવતુ મામવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ નાદબિન્દૂપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Nadabindu Upanishad*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*